Roll No……………………….
Signature of Invigilator ………

Paper Code

BV-303

# पतंजलि विश्वविद्यालय

## University of Patanjali

**Examination March-2021**

**बी. ए. व्याकरण, तृतीयसत्रम्**

**व्याकरणम्, तृतीयपत्रम्**

**संस्कृतसाहित्य**

समयः - होरात्रयम् पूर्णाङ्काः ७०

---

निर्देशः प्रश्नपत्रमिदं 'क' 'ख' इति खण्डद्वयो विभक्तमस्ति, प्रतिखण्डमङ्कनिर्देशो द्रष्टव्यः, प्रदत्तानां निर्देशानामनुसरणपुरस्सरमेव प्रश्नानामुत्तराणि लेखनीयानि।

### ( खण्ड -क )

**खण्डेऽस्मिन् पञ्च प्रश्नाः प्रदत्तास्तेषु त्रयः प्रश्नाः समाधेयाः, प्रतिप्रश्नं पञ्चदशाङ्काः निर्धारिताः।** **( 03 x15 =45 )**

1. छन्दोऽलङ्कारादिनिर्देशपुरस्सरम् अधो निर्दिष्टयोः श्लोकयोः व्याख्या कार्या।

(क) दोषव्यालानतिक्रम्य व्यालान् गृहगतानिव।
क्षमं प्राज्ञस्य न स्वप्तुं निस्तितीर्षोर्महद्भयम्।।

(ख) योगानुलोमं विजनं विशब्दं शय्यासनं सौम्य तथा भजस्व।
कायस्य कृत्वा हि विवेकमादौ सुखोऽधिगन्तुं मनसो विवेकः।।

2. शिवराजविजयमाश्रित्य गौरसिंहस्य चारित्र्यवैशिष्ट्यं प्रतिपादयत।

3. काव्यदीपिकामाश्रित्य का नाम प्रस्तावना? इति सभेदं वर्णयत।

4. अधोलिखितस्य गद्यस्य सप्रसंग व्याख्या कार्या -

महाराष्ट्रदेशरत्नम्, यवनशोणितपिपासाकुलकृपाणः, वीरतासीमन्तिनी -सीमन्त-सुन्दर-सान्द्र-सिन्दूर-दान-देदीप्यमानदोर्दण्डः, मुकुटमणिर्महाराष्ट्राणाम्, भूषणं भटानाम्, निधिर्नीतीनाम्, कुलभवनं कौशलानाम्, पारावारः परमोत्साहानाम्, कश्चन प्रातःस्मरणीयः स्वधर्माग्रहग्रहग्रहिलः, शिव इव धृतावतारः शिववीरश्चास्मिन् पुण्यनगरान्नेदीयस्येव सिंहदुर्गे ससेनो निवसति।

5. अधोलिखितयोः सप्रसंगं व्याख्या कार्या -

(क) भयमागमनान्मृत्यो प्रीति धर्मपरिग्रहात्।
जन्मदुःखादपर्यान्ताच्छोकमागन्तुमर्हसि।।

(ख) लक्ष्यालक्ष्य इवोद्भेदस्तस्य प्रतिमुखं भवेत्।

## ( खण्ड -ख )

**खण्डेऽस्मिन् सप्त प्रश्नाः प्रदत्तास्तेषु केचन पञ्च समाधेयाः, प्रतिप्रश्नं पञ्चाङ्काः निर्धारिताः।** **( 05 x5 =25 )**

1- सौन्दरनन्दाख्यमहाकाव्यस्य चतुर्दशसर्गस्य प्रतिपाद्यविषयो वर्णनीयः।

2- काव्यदीपिकानुसार पूर्वरङ्गस्य स्वरूपं लिखत।

3- प्रवेशकस्य लक्षणं सोदाहरणं लिखत।

4- शिवराजविजयानुसारं विप्रकन्याप्रसङ्गो लेख्यः।

5- शिवराजविजयमनुसृत्य सरोवर-पर्वतखण्डयो-वर्णनं कुरुत।

6- शिवराजविजये वर्णितस्य मुनेर्वर्णनं कुरुत।

7- को नाम कथोद्घातः? स्पष्टीकुरुत।

---------------x---------------